# पर्यावरणदृष्ट्या वेदगतसंस्कृतसाहित्ये आधुनिके युगे प्रासङ्गिकता

**डॉ. क्षितीश्वरनाथ-पाण्डेयः**
**संस्कृतप्राध्यापकः**
**ब्रह्मर्षि संस्कारधाम**
**संस्कृतमहाविद्यालयः, नडीयाद**

आधुनिके युगे मानवः विज्ञानेन पूर्णतया प्रभावितः दृश्यते इति सर्वानुभवः ज्ञानक्षेत्रम् क्रियाक्षेत्रम् वा सर्वत्र एव एषा स्थितिः नास्ति अत्र केषाञ्चित् विप्रतिपत्तिः ।

तत्परिप्रेक्ष्ये मानवजीवनम् आधुनिकसमस्याभिः ग्रस्तः सांसारिको भूत्वा अपि संसाराद् बहिः स्थितिः कथं स्याद् इति प्रश्ने समुदिते सति प्रस्तुतविषयस्य उपस्थापना अनिवार्या वर्तते ।

मानवजीवनस्य सफलतायाः मुख्याधारभूता ज्ञानशक्तिः क्रियाशक्तिः च स्वीक्रियते । एतयो एकापि त्रुटिग्रस्ता भवति चेत् मनुष्यः कदापि स्वलक्ष्ये सफलः न भवति । ज्ञानं विना क्रियायाः क्रियां विना ज्ञानमपि सफलं न भवति । अतः एतादृशस्य ज्ञानस्य गुरोः तथा परमात्मनः कृपापेक्षते यया ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च उचितरूपेण प्रेरितानि स्युः । तथा च सन्मार्गं गच्छामो वयो तदर्थं च प्रेरयेत् । सहैव स अस्मान् तथा प्रेरयेत् येन वयं कर्मणि प्रवृत्ताः धर्मस्य आत्मनः च रक्षणं कुर्वन् प्रकृतिप्रदत्तानि गौरश्वान्तपशुवायुवनस्पतिजलादीनि च सर्वभोगोपयोगीनि वस्तूनि च संरक्ष्य तेषां प्राप्तिः निर्विहनं कुर्यात् । तादृशानि प्रेरणास्त्रोतांसि अस्माकं वेदाः पुराणानि उपनिषदः अस्माकं संस्कृतेः संवाहिकसाहित्यं प्रति नयति कल्याणं च विदधाति। तत्प्रेरणादायकं शास्त्रं कथयति-यदि मनुष्यः नेत्रे पिधाय स्वार्थसाधने प्रवृत्तो भविष्यति चेत् न्यायान्यायः उचितानुचितः शुभाशुभः एतेषां विवेकं विना प्रकृतेः अविवेकितापूर्वकदोहनेन यथाकथञ्चित्प्रकारेण अधिकाधिकसंग्रह-धनार्जन जीवनलक्ष्यं भवति चेत् अन्ते पतनं सुनिश्चितम् । अतः प्रकृतिं प्रति स्नेहः सभादरभाव नितान्तमावश्यकम् ।

एतत् विषयकमतम्-

**ईशावास्यमिदं सर्वं यत्किञ्चिज्जगत्यां जगत् ।**
**तेन त्यक्तेन भुञ्जिथाः मा गृधः कस्यस्विद्धनम् ।।**

भूमौ स्पन्दनशीलाः सर्वे पशुपक्षिणः औषधयः पादपाः पर्वताः वनस्पतयः सर्वेषां समायोजनेन व्यवस्थितरीत्या पर्यावरणस्य रूपरेखां सम्यक् कुर्वन्ति । प्रकृतेः कस्यापि भागस्य क्षयकारणात् सम्पूर्णपर्यावरणस्वरूपमसन्तुलितो जायते ।

महाभारते लिखितमस्ति यद्-नश्वराणामिदं जगत्[२] पारस्परिक सहयोगदेव निर्भरताकारणादेव स्थिरोऽस्ति । सर्वेषां हिताय सर्वोच्चशक्त्या इयं सृष्टिः जाता । इदमावश्यकं यत् सर्वाः प्रजातयः पारस्परिकं सम्बन्धं संस्थाप्य सम्पूर्णप्रक्रियायाः अङ्गत्वेन सर्वेषां हितं चिन्तयेत्। कस्यचिदपि हितहननं न कुर्याद् ।

वर्तमाने काले पर्यावरणीयसन्तुलनस्य समस्याः बहुविधाः वर्तन्ते । तत्र शास्त्राणाम् आवश्यकता इत्थं ज्ञातु शक्यते -

यज्ञेन यज्ञमयजन्तदेवास्तानि धर्माणि प्रथमान्यासन् । यज्ञौ वै विष्णुः । यज्ञौ वै श्रेष्ठतमं कर्म तत्तु प्रथममन्त्रे युजर्वेदसंहितायां वर्तते ।

यज्ञात् भवति पर्जन्यः पर्जन्यादन्नसंग्रहः। पर्जन्यादन्नानि अन्नात् भूस्थलगतप्राणिनां रक्षणं प्राणिभिः प्रकृते क्रियाकलापाः संतुलिताः । वैदिककालादेव भारतीयलोकाचाराणां सांस्कृतिकपरम्पराणां मूर्तरूपप्रदानाय नदीनां भूमिका अतीवमहत्वपूर्णा वर्तते ।

हिन्दुधर्मावलम्बिनां धार्मिकानुष्ठानानि गंगायमुनयोः गोदावरीनर्मदाकावेरीसिन्ध्वादीनां वन्दनया प्रारंभो जायते यथा-

**गंगे च यमुने चैव गोदावरी सरस्वती ।**
**नर्मदे सिन्धु कावेरी जलेऽस्मिन्सन्निधिं कुरु।।**

वर्तमाने काले जलप्रदूषणस्य भयानकतां दूरीकरणाय वैदिकमूल्यानां साहित्यानां च आदरः अनुसरणश्च अस्माकं नदीनामुद्धाराय कल्पते । पयः कीलालममृतं भुवनं जीवनं जलम्-जलमेव जीवनम् अमृततत्व प्राणरक्षणतत्वं जले विद्यमानं वर्तते । जलस्य देवः वरूणः जलपूजा क्रियते अस्माभिः कलशरूपेण । अस्माकमुत्पत्तिजलीयतत्वरूपैणेव जायते । अत एव कलशे जलमेव प्राथम्येन

क्षिप्यते । जलप्रधानत्वात् आद्यावतारः मत्स्यावतारः वर्तते ।

संस्कृतसाहित्ये वर्णितार्यानां कस्यापि राज्ञः ऋषेः ब्राह्मणस्य क्षत्रियस्य शूद्रस्य वा जीवनचरित्रावलोकनेन प्ररिभाति यदुक्तमुद्देश्यं आर्यशिक्षया सम्पूर्णतया ओतप्रोतं च वर्तते । तत्कारणादेव आर्यसंस्कृतिः साहित्यानि च अतिप्राचीनत्वादपि अनेकासां विपदां सोढ्वापि सुरक्षितो वर्तते । आर्याणामाहारविहाराः वेशभूषा आचारविचाराः यज्ञयोगादयः दानपुण्यव्रतोपवासादयः योगः दानपुण्ये व्रतोपवासौ धर्मकर्मणी दयाप्रेम्णी योगसमाधी कर्मफले बंधमोक्षौ [१०] ब्रह्मचर्यम् पातिव्रत्यम् सर्वमिदानीं यावत् स्थितम् । इदं सर्वं सहजतया अनुमन्य वर्तमानपरिस्थितौ स्वरक्षा चिरंजीवी भूयास तदर्थं पूर्णशक्तिप्राप्तये च एतेषां साहित्यनामावश्यकता उपयोगिता च सिद्ध्यति ।

अत्रोक्तं यत् यः कश्चन मित्रेभ्यः देवेभ्य च अदत्वा खादति स मूर्खः साक्षात् पापभक्षणमेव करोति । यः दानं करोति तस्य मानं न्यूनं न भवति । यः याचकाय अदत्वा स्वयं भुङ्क्ते स शान्तिं न प्राप्रोति । हे ईश्वर वयं प्रतिवेशिनं प्रति अन्यायं न कुर्मः । स्वमित्रेभ्यः हानिः अपि न भवेत् यः अस्माकं मित्ररूपेण तिष्ठति तं प्रति अस्माकंः दुर्व्यवहारोऽपि न भवेत् ।

**मित्रस्य चक्षुषा समीक्षामहे ।**[१२]
**सुमित्रिया न आप ओषधयः सन्तु ।**[१३]
**यज्ञशिष्टाशिनः सन्ति मुच्यन्ते सर्वकेल्बिषैः । गीता ३-१३।।**[१४]
**इष्टान् भोगान्हि वो देवा दास्यन्ते यज्ञभाविताः ।**
**तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ।। गीता ३-१२।।**[१५]

भोगकारणादेव मृत्युः प्रतिपादिता

**ध्यायतो विषयान्पुंसः सुङ्गस्तेषूपजायते ।**
**सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते ।।**
**क्रोधाद् भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः ।**
**स्मृतिभ्रंशात् बुद्धिनाशो बुद्धिनाशात् प्रणस्यति ।। गीता २-६१-६२।।**[१६]

शुक्लयजुर्वेदे-

प्रत्युष्टं रक्षः प्रत्युष्टा अरातयो निष्टप्तं रक्षो निष्टप्ता अरातयः ।[१७]

[१८]न राति ददाति स अरातिः दानशत्रवः दानेन धनस्पृहा नश्यति स्नेहोपजायते तेन वातावरणं सौहाद्रमयं भवति ।

भारतीयसंस्कृतौ पर्वतानां विशेषमहत्वमस्ति । हिमालयः देवतात्मा[१९] इति (अस्त्युत्तरस्यां ऋषि देवतात्मा हिमालयो नाम नगाधिराजः कुमारसम्भवे धर्मग्रन्थेषु च भगवतः शिवस्य निवासस्थलम्।

**भूमेः मातुः स्तनरूपेण पर्वताः कामधुक् -**
**समुद्रवसने देवि पर्वतस्तनमण्डले ।**
**विष्णुपत्नि नमस्तुभ्यं पादस्पर्श क्षमस्व मे ।।**

वैदिकैः ऋषिभिः अस्माकं राष्ट्रस्य सांस्कृतिकं सौन्दर्ये आर्थिकजीवनधारोपक्रमे च वृक्षाणां पादपानां वनानां बहुमहत्वं प्रतिपादितम् । ऋग्वेदे ऋतुपतिवर्तनाय ऋतूनां संतुलनायै च [२१] कृष्णर्थं भूमेः उर्वरतायै च मानवजीवनस्य कृते वृक्षाणां वनस्पतीनां पशूनां च महत्वं प्रतिपादितम् । वैदिकभारते वृक्षारोपणं धार्मिकदृष्टया क्रियते स्म । यस्य साहित्यस्योपयोगिता अद्यतने काले वर्तते। वेदानां परिशीलनेन ज्ञायते यत् यः जनः स्वस्य जीवनकाले वृक्षारोपणं करोति पालयति च मृत्योः पश्चात् स्वर्गं याति ।

बृहदारण्यकोपनिषदि वृक्षः [२२]मनुष्यसमः । कालिदासकृतौ वृक्षाः सहोदराः लताः भगिन्यः इति मान्यता । प्रकृतिं प्रति आदरभावः भारतीयसंस्कृतौ कलायां साहित्ये च प्राचुर्येण दृश्यते । प्राचीनं भारतीयं साहित्यं प्रकृतिवन्यजीवनकथाभिसमृद्धः आकरः यज्ञज्ञाननीति द्वयोः समन्वयः दृष्यते ।

भारतीय संस्कृतौ सीता उत वा पार्वतैः अथवा वनकन्या शकुन्तला तासां प्रकृतिप्रेम संस्कृतसाहित्ये स्पष्टतया प्राप्यते ।

**अरण्यबीजाञ्जलिदानलालितास्तथा च तस्यां हरिणा विशुश्वसुः**
**यथा तदीयैर्नयनैः कुतूहलात् पुरः सखीनामिमीतलोचने ।।**[२३]

भारतवर्षस्य कृते वृक्षपूजा नूतना नास्ति अपि तु सहस्रवर्षाधिकस्य प्राचीना परम्परा यतः मत्स्यपुराणे एकस्मिनध्याये अस्य विधिविधानं वर्णितम् । वराहपुराणे वनमहोत्सवस्य वृक्षारोपणसमारोहस्य च वर्णनं यदाधुनिके युगे प्रासङ्गिकता सिद्धयति ।

**अश्वस्थमेकं पिचुमिन्दुमेकं न्यग्रोधमेकं दशपुष्पजातिः ।**
**द्वे द्वे तथा दाडिममातुलुङ्गे पञ्चाम्ररोपी नरकं न याति ।।**[२४]

एकस्मिन् पक्षे वृक्षारोपणेन स्वर्गप्राप्तिस्तथैव अपरे पक्षे मनुना वृक्षच्छेदकेभ्यः अनेकदण्डानि प्रदर्शितानि छेदकेभ्यः प्रायश्चितविधानं च कृतम् ।

**चरकसंहितायां वनाना विनाशः राष्ट्रकल्याणे घातकः उक्तः**
[२५]"**विगुणेष्वपि खल्वेतेषु जनपदध्वंसनकरेषु भावेषु भेषजेनोपाद्यमानानां न भयं भवति** रोगेभ्य इति ।

चिकित्सकीयक्षेत्रे वनस्पतीनां गन्धयुतानां महती आवश्यकता वर्तते वनं विना राष्ट्रकल्याणकल्पनां न कर्तुं शक्यते ।

वेदमन्त्रे-
**दीर्घास्त्वो खनिता यस्मै च त्वा खनाम्यहम् अथो त्वं दीर्घायुर्भुत्वा शत..।**[२६]
यस्य रक्षां वयं कुर्मः स अस्माकं रक्षणं करोति एव । अभिप्रायः प्राकृतिपर्यावरणदूषणकारणतः राष्ट्रे विप्लवः जायते तस्य प्रमाणम् -

वायवस्थदेवः सविता इति यजुर्वेदप्रथममन्त्रे शान्तिपाठे-ओषधयः शान्तिः वनस्पयः शान्तिः अन्तरिक्ष शान्तिः शम उपशमे धातोः तस्याभिप्रायः एतान्यस्माकं शान्त्यै वयं च तेषां रक्षणाय भवितारः ।

आर्याणां वृक्षपूजा केवलधार्मिकमाधारः उत वा पौराणिकं न अपितु वृक्षाणां विभिन्न-तथ्याधारिता वर्तते । शीघ्रगत्या जनसंख्यावृद्धिः औद्योगीकरणं नगरीकरणं च तस्य महत्वाधायकानि उद्देश्यानि प्रति नयति । शनैः शनैः देशस्य वनक्षेत्रं न्यूनं जातं उद्यानारोपणं माभवत् पर्यावरणं गभीरतया प्रभावितम् ।

प्रस्तुतसाहित्यावलोकनं कृत्वा वर्तमाने काले पर्यावरणीयासंतुलनात् कथं मुक्तिः या इदानीं विषधरः भुजङ्ग इव संसारं निगलति । तदानीं संस्कृतसाहित्यं वेदानमोदिता विचारा एव गरूड इव अस्माकं रक्षणे प्रभावोत्यादिका नान्या काचन ।

विज्ञानस्य ज्ञानाऽहंकारः प्रकृतेः रहस्योद्घाटनस्य गर्वेण प्राचीनाः मान्यताः नष्टीकृताः फलतः मानवः स्वभाविकं जीवनं विहाय कृत्रिमजीवनपद्धत्यावलम्बो जातः यतः प्रकृतिः विकृतेः रूपेण परिलक्षिताः। मानवजीवनमेव न अपितु प्राणिनां जीवनमपि दुष्करं वर्तमानकालिकी परिस्थितिः उपस्थिताः

महर्षिः यास्कः अभिमानि व्यपदेशात् रचनायां निगदितवान् जगतः कणःकणः प्रतिकणं देवमयः । तत्र स्थूलं न अपितु सूक्ष्म भावनां कुर्वन्तो । तान्प्रति कृतापराधः पापम् । तस्य परिणामरूपेण नरकं प्राप्नोति । नरकप्राणिमात्रस्याधोगतिरेव।

गंगानदी देवनदी सुरसरी भागीरथी पौराणिकाख्यानानुशीलनेन ब्रह्मद्रवः रासकाले स्वयं नारायणः द्रवीभूतः चेत् तस्य उत्पत्तिः तत्र निमज्जनेन स्वर्गप्राप्तिः भौतिकदृष्ट्या जलस्य जीवनत्वं सिद्धमेव। कालान्तरे देवनदी भावनारूपाचारेण नदीमात्रमेव इदानीं तस्य दुर्दशा मनः पर्यावरणदूषण कारणादेव । मनोदूषणदूरीकरणाय देवत्वभावः अपेक्षते तदर्थं वेदाः साहित्यानि संस्कृतिः च उपायभूतः तस्यैव प्रासंगिकता पर्यावरणरक्षणे जीवनरक्षणे च ।

कारणसत्वे कार्यम् इति न्यायसिद्धान्तः कारणाभावे कार्याभावः मनोमालिन्यं दूरीकरणाय तन्मे मनः शिवसङ्कल्पमस्तु इति सिद्धान्तः वेदेभ्यः एव प्राप्यते । पवित्रमनसा एव पवित्रकार्यं भवितुमर्हति । एतदर्थमेव पाश्चात्यभावनां भोगभावनां परित्यज्य देवभावना अपेक्षते -

**न्यग्रोधं समुपागम्य वैदेही चाभ्यवन्दत।**
**नमस्तेऽस्तु महावृक्ष पायेऽन्ये पतिर्व्रतम् ।।**
**कौशल्यां चैव पश्येम सुमित्रां च यशस्विनीम् ।**
**इति सीताञ्जलिं कृत्वा पर्यगच्छन्मनस्विनी ।।**[२७]

हे शक्तिशालिन् वृक्ष अहं त्वां प्रणमामि मम पत्युः संकल्पपूरयितुं दयां कुरू । यतः अहं स्वस्याः श्वस्त्रवाः कौशल्यायाः सुमित्रायाश्च दर्शनस्य सौभाग्यं प्राप्तं करवाणि ।

आदौ सर्ववृक्षमयं पूर्वविश्वमजायत ।

अर्थात् सृष्टेः काले ईश्वरः सर्ववृक्षपादपेषु विद्यमानः । वृक्षादेवत्वेन तस्य विनाशः उत वा दूषणं पापम् ।

अद्यतने काले वृक्षच्छेदनं बहुवेगेन जायते पद्मपुराणानुसारं तत्दण्डनीयापराधः स्कन्दपुराणेऽपि वृक्षच्छेदनं निन्दनीयम् ।

अस्माकं संस्कृतौ वनस्पतयः जीवनोपयोगिनः पूज्याश्च फलतः अश्वत्थः तुलसीः नीम्बवृक्ष आम्रवृक्षः एतेषां पूजाविधानं वर्तते -

**पार्वती बिल्ववृक्षस्थां लक्ष्मीं च तुलसीगताम् ।**

यत्र तुलस्याः रोपणं पूजनं च क्रियते यमदूताः न गच्छन्ति । आधुनिके कालेऽपि रोगादीनां निदाने तुलस्याः बिल्वपत्रस्य च भूमिका महत्वपूर्णतया वर्तते ।

अपरञ्च संस्कृतसाहित्ये-

**आत्मनः प्रतिकूलानि परेषां न समाचरेत् ।**

इत्यादीनि सूत्राणि पर्यावरणीयदृष्ट्या प्रासंगिकतां द्योतयन्ति ।

सारांशतः जीवने ध्येयप्राप्तये लक्ष्यप्राप्तये च प्रयासे अन्येषां कष्टं न दत्वा स्वाचरणं सम्यक् स्यात् सर्वेषां कल्याणाय स्यात् इदमेव ध्येयं वाक्यं पुराणेष्वपि परोपकार पुण्याय पापाय परपीडनम् ।

सहैव सामाजिकदर्शनम् अस्माभिः कदापि खण्डितो न स्यात् तदतिरिक्तं शिष्टानुशासनस्य पालनत्वं कालानतिक्रमणं समयपालनं च अस्माकं लक्ष्यम् ।

यदि इमानि तथ्यानि उपेक्षानि स्युश्चेत् जीवने समागताः सर्वाः सफलताः महत्वहीनाः अतः ईशावास्यस्य बुद्धि संयमितभोगेन पर्यावरणदृष्ट्या संस्कृतशास्त्रे वर्तते ।

## सहायकग्रन्थसूची


१. ईशावास्योपनिषद् ।

२. महाभारतम् ।

३. शुक्लयजुर्वेदः पुरूषसुक्तम् ।

४. तत्रैव प्रथमे मन्त्रे शुक्लयजुर्वेद संहिता १।

५. गीता ।

६. प्रातः स्मरीय सन्लोकाः नित्यकर्मानुष्ठाने ।

७. अमरकोशः वारिवर्गः ।

८. मत्स्यपुराणम् ।

९. भारतीयसंस्कृतसाहित्येतिहासः ।

१०. मनुस्मृतिः आचाराध्यायः ।

११. यजुर्वेदे पर्यावरणम् -प्रकाशक चौखम्बा विद्याभवन वाराणसी

१२. शुक्लयजुर्वेद संहिता ।

१३. तत्रैव रूद्राष्टाध्यायः च।

१४. गीता ३/१३

१५. गीता ३/१२

१६ गीता २/६१-६२

१७. शुक्लयजुर्वेद संहिता अ १ मन्त्र ७ ।

१८. उब्बटभाष्यम् ।

१९. कुमारसम्भवम् ।

२०. नित्यकर्मपूजाप्रकाश गीताप्रेस गोरखपुर ।

२१. शुक्लयजुर्वेद पर्यावरणम् ।

२२. बृहदारण्यकोपनिषद् ।

२३. शुक्लयजुर्वेद पर्यावरणम् ।

२४. पद्मपुराणे सृष्टिखण्डे ।

२५. चरकसंहिता ।

२६. शुक्लयजुर्वेद संहिता ।

२७. न्यायशास्त्रे मुक्तावलि : ।

२८. भारतीयकर्मकाण्डरूपाध्ययनम् प्र स सं वि वि वाराणसी ।

२९. न्यायवार्तिके तात्पर्य टीका ।

३०. पद्मपुराण सृष्टिकाण्डे ।